# द्वादशज्योतिर्लिङ्गस्मरणम्

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् ।

उज्जयिन्यां महाकालमोङ्कारममलेशरम् ।। १ ।।

परल्यां वैद्यनाथं च डाकिन्यां भीमशङ्करम् ।

सेतुबन्धे तु रामेशं नागेशं दारुकावने ।। २ ।।

वाराणस्यां तु विशेशं त्र्यंबकं गौतमीतटे ।

हिमालये तु केदारं घुश्मेशं च शिवालये ।। ३ ।।

एतानि ज्योतिर्लिङ्गानि सायं प्रातः पठेन्नरः ।

सप्तजन्मकृतं पापं स्मरणेन विनश्यति ।। ४ ।।

।। इति द्वादशज्योतिर्लिङ्गस्मरणं सम्पूर्णम् ।।